| | | |
|---|---|---|
| Kubera's garden. | उद्यानं स्याच्चैत्ररथं[1] विमानं चास्य पुष्पकम्[1] । | Kubera's aero-plane. |
| Kubera's city. | अलका[1] नगरी ज्ञेया पुत्रस्तु नलकूवरः[1] ॥ ८३ ॥ | Kubera's son. |
| The architect of the gods 2. | विश्वकृद्[1]विश्वकर्मा[2] च त्वष्टा[3] स्याद्देववर्धकिः[4] । | |
| God's doctors or physicians 4. | नासत्या[1]वश्विनौ[2] दस्रौ[3] प्रोक्तौ देवचिकित्सकौ[4] ॥ ८४ ॥ | |
| Name of Gautam Buddha 11. | शौद्धोदनि[1]र्दशबलो[2] वुद्धः[3][a] शाक्य[4]स्तथागतः[5] सुगतः[6] । | |
| | मारजि[7]दद्वयवादी[8] समन्तभद्रो[b][9] जिनश्च[10] सिद्धार्थः[e][11] ॥ ८५ ॥ | |
| A Jain saint. | जिनेन्द्रो[1] वीतरागो[2]ऽर्हन्[3] केवली[4] च त्रिकालवित्[5] । | |
| Misfortune 2. | अलक्ष्मी[1]र्निर्ऋति[2]र्ज्ञेया नियति[1]र्विधि[2]रुच्यते ॥ ८६ ॥ | Fate, luck 2. |
| Different Deva-yonies 11. | यक्ष[1]राक्षस[2]गन्धर्व[3]सिद्ध[4]किन्नर[5]गुह्यकाः[6] । | |
| | विद्याधरा[7]प्सरो[8]भूत[9]पिशाचा[10] देवयोनयः[11] ॥ ८७ ॥ | |
| A nymph of Indra's heaven 7. | घृताची[1] मेनका[2] रम्भा[3] उर्वशी[4] च तिलोत्तमा[5] । | |
| | सुकेशी[6] मञ्जुघोषा[7]द्याः कथ्यन्तेऽप्सरसो बुधैः ॥ ८८ ॥ | |
| Contempt. (1) Prurience. (2) Coquettishness. (3) Affectation of indifference. (4) Imitation (5) Gracefulness of gait. (6) Flurry. (7) Feminine action, emotion. | हेला[1]विलास[2]विब्बोक[3]लीला[4]ललित[5]विभ्रमाः[6] । | |
| | स्त्रीणां श्रृङ्गारचेष्टाः[d] स्युर्हाव[7]पर्यायवाचकाः ॥ ८९ ॥ | |
| | बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत् । | |
| | स[e] भावः[1] कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः ॥ ९० ॥ | |
| (1) Love (2) Laughter (3) Grief (4) Anger (5) Effort (6) Fear (7) Disgust (8) Wonder (9) Quietness. | रति[1]र्हास[2]श्च शोक[3]श्च क्रोधो[4]त्साहौ[5] भयं[6] तथा[f] । | |
| | जुगुप्सा[7]विस्मय[8]शमाः[9] स्थायिभावाः प्रकीर्तिताः ॥ ९१ ॥ | |
| 1. Emotion of love, Erotic. 2. The emotion of laughter. Comic. 3. The emotion of pathos or tender grief. Pathetic. 4. The emotion of anger. Furious. | श्रृङ्गार[1]हास्य[2]करुणा[3] रौद्र[4]वीर[5]भयानकाः[6] । | Nine '*rasas*' used in drama 5. The emotion of heroism, heroic. 6. The emotion of fear or terror. 7. Odious, the emotion of disgust. 8. Marvellous, the emotion of wonder or admiration. 9. Pacific. |
| | बीभत्सा[7]द्भुत[8]शान्ता[9]श्च नव नाट्ये रसाः स्मृताः ॥ ९२ ॥ | |

a बुधः b सुमन्तभद्रो c तुल्यार्थाः d श्रृङ्गारचेष्टाः स्यु०, श्रृङ्गारचेष्टा च e स्वभावः, भावकः f समाः ।